**सा(शा)लेय** पु॰ सा(शा)लायां भवः ढक्। मधुरिकायाम् अमरः

**सालोक्य** न॰ समानो लोकोऽस्य तस्य भावः ष्यञ्। सायुज्यशब्दोक्ते पञ्चविधमुक्तिमध्ये एकलोकस्थवासरूपे मुक्तिभेदे।

**सा(शा)ल्व** पु॰ ब॰ व॰ देशभेदे। तेषां राजा अण्। तद्देशाधिपे नृपभेदे स च श्रीकृष्णेन हतः भा॰ व॰ १४अ॰ दृश्यम्। [हेमच॰।

**सा(शा)ल्वहन्** पु॰ साल्वं नृपं हतवान् हन-क्विप्। विष्णौ

**सावधान** त्रि॰ सह अवधानेन। १सचेतने सतर्के २मनोभिनिवेशयुक्ते च।

**सावन** न॰ सवनं यागाङ्गं स्नानं सोमनिष्पीडनं वा तस्येदम् अण्। "अहोरात्रेण चैकेन सावनो दिवसः स्मृतः" ब्रह्मसिद्धान्तोक्ते १अहोरात्रात्मके दिवसे, सवनत्रयस्य अहोरात्रसाध्यत्वादस्य तत्सम्बन्धित्वम्। तत्त्रिंशद्दिवसात्मके २मासभेदे च पु॰ "चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः" विष्णुध॰ "सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः" म॰ त॰। "सूतकादिपरिच्छेदो दिनमासाब्दपस्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्यसिद्धान्तः। सावनमासकृत्यानि च विशेषतः कानिचित् म॰ त॰ पितामहेनोक्तानि "विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः" "आदिपदेन सम्भूतिशुद्धिप्रायश्चित्तायुर्दायाशौचगर्भाधानपुंसवनसीमन्तोन्नयननामकरणान्नप्राशननिष्क्रमणचूडादिग्रहणम्" म॰ त॰ रघु॰। एषु सावनेन कालेनैव वर्षगणना "घनाद्युपाख्यानाथ सावनेन लोकस्य यत् स्याद्व्यवहारकर्म" विष्णुध॰ ३अध्याये "सौराब्दस्तु मानेन यदा भवति भार्गव!। सावनेन च मानेन दिनषट्कं प्रपूर्य्यते"। "सौरवर्षे दिनषट्काधिकसावनवर्षो भवतीति रघु॰। दिनषट्कमिति प्रान्तिकम् सौरवर्षे सावनस्य ५।१५।३१।३०।२४ दिनाद्याधिक्यस्यैव सिद्धान्तोक्तेः। ४यज्ञान्ते ५यजमाने ६वरुणे च पु॰ मेदि॰।

**सा(शा)वर** पु॰ स(श)वरेण निर्वृत्तः अण्। १पापे २अपराधे च त्रिका॰। ३लोध्रे शब्दच॰।

**सावर्णि** पु॰ सवर्णायां सूर्य्यपत्न्यां संज्ञायां भवः अण्। सवर्णागर्भजे सूर्य्यात् अष्टमे मनौ दृश्य। सावर्णिरष्टम "सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः" "सूर्य्यात्मज सवर्णायाम् सावर्णिर्भविता मनुः" देवीभा॰। "छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः। पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन कथ्यते" देवीभाग॰ तन्नामनिरुक्तावुक्तम् "विवस्वतश्च द्वे भार्य्ये विश्वकर्मसुते उभे। संज्ञा छाया च राजेन्द्र! ये प्रागभिहिते तव। तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु। सावर्णिस्तपती कन्या भार्य्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूत् अश्विनौ वडवात्मजौ। अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः" भाग॰ ८।१३अ॰। कल्पभेदादविरोधः।

**सावित्र** पु॰ सविता देवताऽस्य अण्। १विप्रे हेमच॰। २ऋग्विशेषे स्त्री ङीप्। "सावित्रीमात्रसारोऽपि" मनुः। सा च ३सत्यवतोभार्य्यायाम् स्त्री ४सवितृदेवताके चर्वादौ त्रि॰। ५यज्ञोपवीते न॰ शब्दच॰। स्वार्थे अण्। ६सूर्य्ये पु॰ शब्दच॰। तस्येदम् अण्। ७महादेवे वसौ च पु॰ मेदि॰। ८गर्भे शब्द॰ १०ब्रह्मपत्न्यां स्त्री ११दुर्गायां च स्त्री मेदि॰। तन्नामनिरुक्तिः देवीपु॰ ४४अ॰ "त्रिदशैरर्च्चिता देवी वेदभागेषु पूजिता। भावशुद्धस्वरूपा तु सावित्री तेन सा स्मृता" वह्निपु॰। अन्या निरुक्तिः "सर्वलोकप्रसवनात् सविता स तु कीर्त्त्यते। यतस्तद्देवता देवी सावित्रीत्युच्यते ततः। वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः"। ब्रह्मपत्नी च शतरूपा "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत्। शतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप!" मत्स्यपु॰ ३अ॰। गायत्रीशब्दे दृश्यम्।

**सावित्रीव्रत** न॰ सावित्रीपूजनमुद्दिश्य कर्त्तव्यं व्रतम्। ज्यैष्ठकृष्णचतुर्दश्यां सावित्रीपूजनार्थे व्रते तद्विधिर्यथा "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्दशी। कृष्णयुग्मैव कर्त्तव्या शुक्लापि हि पारणम्" ति॰ त॰ धृतवचनम्। यमः "दत्त्वा जलाञ्जलीन् सप्त कृष्णपक्षे चतुर्दशीम्। धर्मराजं समुद्दिश्य सर्वपापैः प्रमुच्यते"। लिङ्गपुराणे "उपवासश्चतुर्दश्यां महापातकनाशकः"। पराशरः "भौमे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्"। तां चतुर्दशीम् "ज्यैष्ठे कृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुः"। राजमार्त्तण्डकृत्यचिन्तामण्योः "ज्यैष्ठे मासि चतुर्दश्यां सावित्रीव्रतमुत्तमम्। अवैधव्याय कुर्वन्ति स्त्रियः श्रद्धासमन्विताः"। व्रतकाले तु आगन्तुकतीथ्यागोक्तमाचरन्ति वटपरिक्रमणान्वयात् तदुक्तं मत्स्यपुराणे "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला। यदाऽशुद्धा तदा